M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 8.9a

Title: Shiva kuvacha

809

शिव कवच

Shiva kavacha		Title
		Author
		Editor
		Year, Vols.
		Publisher
809a	2 Copies.	Remarks

॥अथश्रीशिवस्तवःप्रारंभः॥

शि.क.
१

॥ ॥श्रीगणेशायनमः॥श्रीसांबसदाशिवायनमः॥
ॐ अस्यश्रीशिवकवचस्तोत्रमंत्रस्य॥ब्रह्माऋषिः॥अनुष्टुप्
छंदः॥श्रीसदाशिवोदेवता॥ह्रींबीजंह्रींशक्तिः॥ह्रींकीलक
कं॥ मम सर्वपुरुषार्थसिध्यर्थंजपेविनियोगः॥ब्रह्मर्षये
नमःशिरसि॥अनुष्टुप्छंदसेनमःमुखे॥श्रीसदाशिवदे
वताभ्योनमःहृदये॥ह्रींबीजायनमःगुह्ये॥ह्रींशक्तयेन
मःपादयोः॥ह्रौंकीलकायनमःसर्वांगे॥ अथन्यासः॥ १

ॐनमोभगवतेरुद्रायज्वलज्वलज्वालामालिनेक्ष्रीं
क्ष्रौंरंरुद्रायनमः॥ॐॐअंगुष्ठाभ्यांनमः॥ॐनमोभ
गवतेरुद्रायज्वलज्वलज्वालामालिनेह्रींश्रींक्ष्रौंरंरुद्राय
नमःॐतर्जनीभ्यांनमः॥ॐनमोभगवतेरुद्रायज्व
लज्वलज्वालामालिनेह्रींश्रींक्ष्रौंरंरुद्रायनमःॐम
ध्यमाभ्यांनमः॥ॐनमोभगवतेरुद्रायज्वलज्व
ज्वालामालिनेह्रींश्रींक्ष्रौंरंरुद्रायनमःॐशिअनामिका

शि॰क॰
२

स्यां नमः॥ ॐ नमो भगवते रुद्राय ज्वल ज्वल ज्वालामालि
ने ह्रीं श्रीं क्लीं रं रुद्राय नमः ॐ वां कनिष्ठिकाभ्यां नमः॥ ॐ
नमो भगवते रुद्राय ज्वल ज्वल ज्वालामालिने ह्रीं श्रीं क्लीं
रं रुद्राय नमः ॐ यं करतलकरपृष्ठाभ्यां नमः॥ एवं हृद
यादिः॥ ॐ नमो भगवते रुद्राय ज्वल ज्वल ज्वालामालिने
ह्रीं श्रीं क्लीं रं रुद्राय नमः। ॐ ॐ हृदयाय नमः॥ ॐ न
मो भगवते रुद्राय ज्वल ज्वल ज्वालामालिने ह्रीं श्रीं क्लीं

२

रं रुद्राय नमः॥ ॐ नं शिरसे स्वाहा॥ ॐ नमो भगवते रु
द्राय ज्वल ज्वल ज्वालामालिने ह्रीं श्रीं क्लीं रं रुद्राय नमः
ॐ मं शिखायै वषट्॥ ॐ नमो भगवते रुद्राय ज्वल ज्व
ल ज्वालामालिने ह्रीं श्रीं क्लीं रं रुद्राय नमः ॐ शिं कवचा
य हुं॥ ॐ नमो भगवते रुद्राय ज्वल ज्वल ज्वालामालिने
ह्रीं श्रीं क्लीं रं रुद्राय नमः ॐ वां नेत्रत्रयाय वौषट्॥ ॐ
नमो भगवते रुद्राय ज्वल ज्वल ज्वालामालिने ह्रीं श्रीं क्लीं

रं रुद्रायनमः ॐ यंअस्त्रायफट्॥ ॥अथध्यानं॥ ॥
वज्रदंष्ट्रंत्रिनयनं कालकंठमरिंदमं॥ सहस्रकरमत्यु
ग्रंवंदेदेवंसदाशिवं॥१॥ ॥इतिध्यात्वामानसिकैरुपचारै
रभ्यर्च्य स्तोत्रमारभेत्॥ ॥अतःपरं सर्वपुरा
णगुह्यं निःशेषपापौघहरं पवित्रं॥जयप्रदं सर्ववि
पत्प्रमोचनं वक्ष्यामिशैवंकवचं हिताय ते॥२॥ ॥

ऋषभउवाच॥ नमस्कृत्वामहादेवंसर्वव्यापिनमीश्वरं
॥ वक्ष्येशिवमयंवर्म सर्वरक्षाकरंनृणां॥३॥ शुचौदेशे
समासीनोयथावत्कल्पितासनः॥ जितेंद्रियोजितप्रा
णश्चिंतयेच्छिवमव्ययं॥४॥ हृत्पुंडरीकांतरसंनिवि
ष्टं स्वतेजसाव्याप्तनभोवकाशं॥अतींद्रियंसूक्ष्ममनं
तमाद्यंध्यायेत्परानंदमयंमहेशं॥५॥ ध्यानावधूता
खिलकर्मबंधश्चिरंचिदानंदनिमग्नचेताः॥ षडक्षर

न्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षां ॥ ६ ॥ मां पा
तु देवोखिलदेवतात्मा संसारकूपे पतितं गभीरे ॥ तन्नाम
दिव्यं वरमंत्रमूलं धुनोतु मे सर्वमघं हृदिस्थं ॥ ७ ॥ सर्वत्र मां
रक्षतु विश्वमूर्तिर्ज्योतिर्मयानंदघनश्चिदात्मा ॥ अणोर
णीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥ ८ ॥ यो
भूस्वरूपेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशोष्टमूर्तिः ॥
योऽपां स्वरूपेण नृणां करोति संजीवनं सोवतु मां जलेभ्यः ॥ ९ ॥

कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः
॥ स कालरुद्रोऽवतु मां दवाग्नेर्वात्यादिभीतेरखिलाच्च तापा
त् ॥ १० ॥ प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठा
रपाणिः ॥ चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां दिशो रक्ष
तु मामजस्रं ॥ ११ ॥ कुठारवेदांकुशपाशशूलकपालढ
क्काक्षगुणान्दधानः ॥ चतुर्मुखो नीलरुचिस्त्रिनेत्रः
पायादघोरो दिशि दक्षिणस्यां ॥ १२ ॥ कुंदेंदुशंखस्फटिका

वभासो वेदाक्षमालावरदाभयांकः॥ त्र्यक्षश्चतुर्वक्त्र उरु
प्रभावः सद्योऽधिजातोऽवतु मां प्रतीच्यां॥१३॥ वराक्ष
मालाभयटंकहस्तः सरोजकिंजल्कसमानवर्णः॥ त्रिलो
चनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः॥१४
॥ वेदाभयेष्टांकुशपाशटंककपालदक्काक्षकशूलपा
णिः॥ सितद्युतिः पंचमुखोऽवतान्मामीशान ऊर्ध्वं
परमप्रकाशः॥१५॥ मूर्धानमव्यान्ममचंद्रमौलिर्भा

लं ममाव्यादथ भालनेत्रः॥ नेत्रे ममाव्याद्भगनेत्रहा
री नासां सदा रक्षतु विश्वनाथः॥१६॥ पायाच्छ्रुती मे श्रु
तिगीतकीर्तिः कपोलमव्यात्सततं कपाली॥ वक्त्रं सदा र
क्षतु पंचवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः॥१७॥ कंठं
गिरीशोवतु नीलकंठः पाणिद्वयं पातु पिनाकपाणिः॥ दो
र्मूलमव्यान्ममधर्मबाहुर्वक्षःस्थलं दक्षमखांतकोव्या
त्॥१८॥ ममोदरं पातु गिरींद्रधन्वा मध्यं ममाव्यान्मद

नांतकारी॥ हेरंबतातोममपातुनाभिंपायात्कटिंधूर्जटिरी
श्वरोमे॥१९॥ ऊरुद्वयंपातुकुबेरमित्रोजानुद्वयंमेजग
दीश्वरोऽव्यात्॥ जंघायुगंपुंगवकेतुरव्यात्पादौममा
व्यात्सुरवंद्यपादः॥२०॥ महेश्वरःपातुदिनादियामे
मांमध्ययामेऽवतुवामदेवः॥ त्रियंबकःपातुतृतीय
यामेवृषध्वजःपातुदिनांत्ययामे॥२१॥ पायान्निशा
दौशशिशेखरोमांगंगाधरोरक्षतुमांनिशीथे॥ गौरी

पतिःपातुनिशावसानेमृत्युंजयोरक्षतुसार्वकालं॥
२२॥ अंतःस्थितंरक्षतुशंकरोमांस्थाणुःसदापातुब
हिःस्थितंमां॥ तदंतरेपातुपतिःपशूनांसदाशिवोर
क्षतुमांसमंतात्॥२३॥ तिष्ठंतमव्याद्भुवनैकनाथःपा
याद्व्रजंतंप्रमथाधिनाथः॥ वेदांतवेद्योऽवतुमांनिष
ण्णंमामव्ययःपातुशिवःशयानं॥२४॥ मार्गेषुमांर
क्षतुनीलकंठःशैलादिदुर्गेषुपुरत्रयारिः॥ अरण्यवा

सादिमहाव्याघ्रसेपायान्मृगव्याधउदारशक्तिः॥२५॥
कल्पांतकाटोपपटुप्रकोपस्फुटाट्टहासोच्चलितांडको
शः॥ घोरारिसैन्यार्णवदुर्निवारमहाभयाद्रक्षतुवीरभ
द्रः॥२६॥पत्त्यश्वमातंगघटावरूथसहस्रलक्षायुत
कोटिभीषणं॥अक्षौहिणीनांशतमातताय्यिनंछि
द्यान्मडोघोरकुठारधारया॥२७॥निहंतुदस्यून्प्र
लयानलार्चिस्त्वत्खड्गशूलंत्रिपुरांतकस्य॥शार्ङ्गं ७

सिंहर्क्षवृकादिहिंस्रान्संत्रासयत्वीशधनुःपिना
कः॥२८॥दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भि
क्षदुर्व्यसनदुःसहदुर्यशोसि॥उत्पाततापविषभी
तिमसद्ग्रहार्तिव्याधींश्चनाशयतुमेजगतामधी
शः॥२९॥ ॐनमोभगवतेसदाशिवायसक
लतत्वात्मकायसर्वमंत्रस्वरूपायसर्वयंत्राधिष्ठि
ताय सर्वतंत्रस्वरूपायसर्वतत्वविदूरायब्रह्म

रुद्रावतारिणे नीलकंठाय पार्वतीमनोहरप्रियाय सोम
सूर्याग्निलोचनाय भस्मोद्धूलितविग्रहाय महामणि
मुकुटधारणाय माणिक्यभूषणाय सृष्टिस्थितिप्रलय
कालरौद्रावताराय दक्षाध्वरध्वंसकाय महाकालभे
दनाय मूलाधारैकनिलयाय तत्त्वातीताय गंगाधराय
सर्वदेवाधिदेवाय षडाश्रयाय वेदांतसाराय त्रिवर्गसा
धनाया नंतकोटिब्रह्मांडनायकाया नंतवासुकितक्षक ९

कर्कोटकशंखकुलिकपद्ममहापद्मेत्यष्टमहानागकुल
भूषणाय प्रणवस्वरूपाय चिदाकाशायाकाशादिकूट
रूपाय यहनक्षत्रमालिने सकलायकलंकरहिताय
सकललोकैककर्त्रे सकललोकैकभर्त्रे सकललोकैकसं
हर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकल
निगमगुह्याय सकलवेदांतसाराय सकललोकैकव
रप्रदाय सकललोकैकशंकराय शंशंकशेखराय शा

श्वतनिजाभासाय निराभासाय निरामयाय निर्मलाय
निर्जीभाय निर्मदाय निश्चिंताय निरहंकाराय निराकु
लाय निष्कलंकाय निर्गुणाय निष्कामाय निरुपप्लवा
य निरवद्याय निरंजनाय निष्कारणाय निरानंकाय
निष्प्रपंचाय निःसंगाय निर्द्वंद्वाय निराधाराय निर
गाय निष्क्रोधाय निर्ममाय निष्पापाय निर्भयाय नि
र्विकल्पाय निर्भेदाय निष्क्रियाय निस्तुलाय निः सं

शयाय निरंजनायनिरुपमविभवाय नित्यशुद्धबु
द्धपरिपूर्णसच्चिदानंदाद्वयाय परमशांतस्वरूपा
यतेजोरूपायतेजोमयायजयजयरुद्रमहारौद्रभ
द्रावतारमहाभैरवकालभैरवकल्पांतभैरवकपाल
मालाधरखड्गखट्वांगचर्मपाशांकुशडमरुकशूल
चापबाणगदाशक्तिभिंदिपालतोमरमुसलमुद्ग
रप्रासपट्टीशायुधभीषण

करसहस्रमुखदंष्ट्राकरालवदनविकटाट्टहासविस्फा
रितब्रह्मांडमंडलनागेंद्रकुंडलनागेंद्रहारनागेंद्र
केयूरनागेंद्रचर्मधरमृत्युंजयत्र्यंबकत्रिपुरांतक
विश्वरूपविरूपाक्षविश्वेश्वरवृषभवाहनविश्वतो
मुखसर्वतोरक्षरक्षमांज्वलज्वलमहामृत्युभयमृ
त्युभयंनाशयनाशयसर्वरोगभयमुत्सादयोत्साद
यविषसर्पभयंशमयशमयचोरान्मारयमारयमम १०

शत्रूनुच्चाटयोच्चाटयशूलेनविदारयविदारयकुठारे
णभिंधिभिंधिखड्गेनछिंधिछिंधिखट्वांगेनविपोथय
विपोथयमुसलेननिष्पेषयनिष्पेषयबाणैःसंताड
यसंताडयरक्षांसिभीषयभीषयाशेषभूतानिविद्रा
वयविद्रावयकूष्मांडवेतालमारीब्रह्मराक्षसग
णान्संत्रासयसंत्रासयममाभयंकुरुकुरुवित्रस्तं
मामाश्वासयाश्वासयनरभयान्मामुद्धरोद्धरसंजीव

य संजीवय क्षुत्तृष्णार्तं मामाप्याययाप्याययदुःखा
तुरं मामानंदयानंदय शिवकवचेन मामाछादयाछा
दय मृत्युंजय त्र्यंबक सदाशिव भगवन्नमस्ते नमस्ते॥
१००० ॥ इति मालामंत्रः॥ ॥ ऋषभ उवाच॥
इत्येतत्कवचं शैवं वरदं व्याहृतं मया॥ सर्वबाधाप्र
शमनं रहस्यं सर्वदेहिनां॥ ३०॥ यः सदा धारयेन्म
र्त्यः शैवं कवचमुत्तमं॥ न तस्य जायते क्वापि भयं शं

भोरनुग्रहात्॥ ३१॥ क्षीणायुः प्राप्तमृत्युर्वा महारो
गहतोपि वा॥ सद्यः सुखमवाप्नोति दीर्घमायुश्च विं
दति॥ ३२॥ सर्वदारिद्र्यशमनं सौमांगल्यविवर्धनं
॥ योधत्ते कवचं शैवं सदेवैरपि पूज्यते॥ ३३॥ महापा
तकसंघातैर्मुच्यते चोपपातकैः॥ देहांते मुक्तिमाप्नो
ति शिववर्मानुभावतः॥ ३४॥ त्वमपि श्रद्धया वत्स शै
वं कवचमुत्तमं॥ धारयस्व मया दत्तं सद्यः श्रेयो ह्यवा

प्यसि ॥३५॥ सूत उवाच ॥ इत्युत्कात्रुषभो योगी ल।
स्मेपार्थिवसूनवे ॥ ददौ शंखं महानादं खड्गं चारिनिषू
दनं ॥३६॥ पुनश्चभस्मसंमंत्र्य तदंगपरितोऽस्पृशत्
॥ गजानां षट्सहस्रस्य द्विगुणं च बलं ददौ ॥३७॥ भस्म
प्रभावात्संप्राप्तबलैश्वर्यधृतिस्मृतिः ॥ सराजपुत्रः शु
शुभेशारदर्क्षइवश्रिया ॥३८॥ तमाहप्रांजलिंभूत्वा स
योगीनृपनंदन ॥ एषखड्गो मयादत्तस्तपोमंत्रानुभावि १२

नः ॥३९॥ त्रिलधारमिमंखड्गं यस्मैदर्शयसेस्फुटं ॥
समद्योम्रियतेशत्रुः साक्षान्मृत्युरपिस्वयं ॥४०॥
अस्यशंखस्यनिर्ह्रादं येश्रृण्वंतिनराहिताः ॥तेमू
र्छिताःपतिष्यंतिन्यस्तशस्त्रा विचेतनाः ॥४१॥ खड्ग
शंखाविमौदिव्यौपरसैन्यविनाशिनौ ॥आत्मसैन्य
स्वपक्षाणांरौर्यतेजोविवर्धनौ ४२॥एतयोश्चप्रभा
वेनशैवेनकवचेनच ॥ द्विषट्सहस्रनागानांबलेन

महतापिच ॥ ४३ ॥ भस्मधारणसामर्थ्यादैश्वनुसेन्यं
विजेष्यसि ॥ प्राप्यसिंहासनं पैत्र्यं गोप्तासि पृथिवी
मिमां ॥ ४४ ॥ इतिभद्रायुषंसम्यगनुशास्यसमाहृ
तं ॥ नाभ्यांसंपूजितःसोथयोगीस्वैरगतिर्ययौ ॥
४५ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेऋषभ
प्रोक्तशिवधर्मकथनंनामद्वादशोध्यायः ॥ १२ ॥ ॥ १३

श्रीसांबसदाशिवार्पणमस्तु ॥ ॥ श्रीरस्तु ॥

४०७५

॥इति श्रीशिवकवचं समाप्तं॥